Postal Regd.No. GAMC- 1553/2025-2027
ISSN 2454-6313

संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्कः : २४३
जुलाई - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad Unaccountable L1 on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

चिन्तनम्

सतीशः गज्जर्

हृद्यं काव्यम्

वृष्टिदेवी बहून् विलक्षणान् क्षणान् अङ्के सङ्गृह्य पृथ्वीम् अवतरति। सा यदा विरमति तदा इन्द्रधनुः आकाशस्य मण्डनम् आरभते । लघुः आसम्, तदा इन्द्रधनुः सविस्मयं पश्यामि स्म। तत् शैशवं प्रयातम्, किन्तु सः विस्मयः, उत्तमर्णस्य मूलनिधिः इव, तथैव संरक्षितः वर्तते। इन्द्रधनुः निसर्गस्य किमपि हृद्यं काव्यम् अस्ति । अथवा नान्दीश्लोकः अस्ति । इन्द्रधनुः केन कारणेन मनुष्यान् विस्मापयति ? सप्त वर्णाः पृथिव्यां दुर्लभाः न सन्ति। तान् वर्णान् वयं चित्रकारस्य वर्णपेटिकायाम् अपि द्रष्टुं शक्नुमः । कारणं न ज्ञायते। किन्तु कश्चित् उन्मत्तः विचारः स्फुरति। किमपि वर्णमयं चित्रं रचयितुं फलकस्य पुरतः उपविष्टः स्वयं ब्रह्मा वर्णानां परीक्षणं कुर्वन् स्यात् ?

अपरम् अपि विस्मयपदं वर्तते। सर्वत्र प्रकाशस्य एव कीर्तनं श्रूयते। प्रकाशस्य महिमवर्णनं बहु अभवत्। विद्वद्भिः ज्ञानम् अपि प्रकाशेन सह योजितम्। अन्धकारस्य च सम्बन्धः साक्षात् अज्ञानेन सह ! तमोगुणाः मनुष्याः पतन्ति इत्यपि शास्त्रकारैः घोषितम् । मोक्षप्राप्तौ आद्यः सहायः तु प्रकाशः एव ननु । एवं चेत् अस्माकं जीवने अन्धकारस्य स्थानम् एव न ?

व्यवहारपथे रात्रेः अपेक्षया दिवसस्य उपयोगिता अधिका, तथापि तावता तर्केण रात्रेः महत्त्वं न्यूनं न भवति। वस्तुतः वयं यावत् दिवसे द्रष्टुं न शक्नुमः तावत् रात्रौ पश्यामः। दिवसे केवलं सूर्यं द्रष्टुं शक्नुमः, परन्तु रात्रौ अनन्ते आकाशे तरन्ति असङ्ख्यानि नक्षत्राणि अवलोकयितुं शक्नुमः। यदि रात्रिः न भवति तर्हि विश्वेश्वरस्य भव्यां कृतिं वयं कथं ज्ञातुं वा कल्पयितुं वा शक्नुयाम ? अपि च केवलम् अन्धकारे द्रष्टुं समर्थानाम् (उलूकादीनां) सत्त्वानां समाजे (वस्तुतः समजे) तत्त्वज्ञानस्य व्याख्या भिन्ना गभीरतरा वा न स्यात् ? कृष्णस्य वचनं स्मरणपथम् आयाति – 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।' अत्र उलूकस्य तुलनां संयमिभिः सह करिष्यामि चेत् धर्मनिष्ठाः साधकाः खिन्नाः भविष्यन्ति। एषः विषयः अत्रैव विरमतु तावत्।

अपूपे रत्नानि



पूर्वं कश्चन राजा आसीत् । हस्तगतस्य भाग्यस्य उपयोगं जनाः कथं कुर्वन्ति इति ज्ञातुं महत् कुतूहलं तस्य। कदाचित् सः प्रासादस्य पाचकम् अवदत् यत् उत्तमम् अपूपद्वयं सज्जीक्रियताम् । पाचकेन अपूपद्वयं सज्जीकृतम् । तत्र एकः सामान्यः इव दृश्यते स्म । अपरः बृहन् स्फीतः च । तस्य अन्तः कानिचन रत्नानि अपि स्थापितानि आसन्।

कश्चन आस्थानिकः प्रतिसप्ताहं दानं करोति स्म । राजा तम् उक्तवान् – "आर्य ! यः योग्यः इति भासते तस्मै एतं विशिष्टम् अपूपं ददातु। अन्यम् अपूपं कस्मैचित् वा भवान् दातुम् अर्हति" इति।

दानदिने प्रातः उभौ आस्थानिकस्य समीपम् आगतवन्तौ । तयोः अन्यतरः दीर्घश्मश्रुकः, विशिष्टं युतकं धृतवान् च आसीत्। दर्शनात् एव भासते स्म यत् एषः कश्चन साधुः। अपरः आसीत् सामान्यः याचकः। तस्मै साधवे आस्थानिकः रत्नमयम् अपूपं दत्तवान्। सामान्याय याचकाय अपरम् अपूपं दत्तवान् सः ।

अग्रे किं प्रवर्तेत इति ज्ञातुम् इच्छन् राजा भवनस्य ऊर्ध्वभागे स्थित्वा सर्वं परिशीलयन् आसीत्। रत्नमयम् अपूपं प्राप्तवान् साधुजनः अपूपस्य भारं सकृत् परीक्षितवान्। एषः अपूपः सम्यक् पक्वः न स्यात् इति भावः तस्य मनसि आगतः । अतः सः सामान्यं याचकम् अवदत् – "मित्र ! एषः अपूपः भारयुक्तः इव दृश्यते। अहं तु इदानीं बुभुक्षितः नास्मि। किं भवान् एतं स्वीकृत्य भवतः समीपे यत् अस्ति तत् अल्प–भारोपेतं मह्यं दद्यात् ?" इति।

सामान्यः याचकः एतत् अङ्गीकृतवान्। ततः सः स्वस्य हस्ते स्थितं तस्मै साधवे दत्त्वा साधुना दत्तं स्वीकृत्य ततः निर्गतवान्।

सामान्याय याचकाय भारयुतम् अपूपं दत्तवतः साधोः मुखे मन्दहासः विलसति स्म। 'अर्धपक्वम् अपूपम् एतस्मै यच्छता मया महत् कौशलं प्रदर्शितम्' इति चिन्तयन् सः अपि आनन्देन ततः निर्गतवान्।

एतत् दृष्ट्वा राजा अचिन्तयत्– 'भगवतः सङ्कल्पः विचित्रः। एतस्य धनिकत्वं न इच्छति देवः। अतः एव सः रत्नमयम् अपूपम् एतद्धस्तगतं कर्तुं न इष्टवान्' इति।

अग्रे किं प्रवर्तेत इत्यपि ज्ञातव्यम् इति राजा अचिन्तयत् । अतः सः उभौ गुप्तचरौ आज्ञापितवान् – "भवद्भ्याम् एतौ अनुसरणीयौ। अपूपं नीत्वा किं कुरुतः इति ज्ञात्वा अहं वक्तव्यः" इति।

गुप्तचरौ सायं प्रत्यागत्य राजानं प्रवृत्तं सर्वं निवेदितवन्तौ। सः साधुः प्रासादात् निर्गत्य कुटीरं गतवान्। तत्र तेन युतकम् अपनीतम्। श्मश्रु अपि अपनीतम्! ये आहारपदार्थाः सङ्गृहीताः ते तेन खादिताः। अनन्तरं यथापूर्वं श्मश्रु मुखे धृत्वा युतकं च धृत्वा भिक्षायाचनाय सः पुनरपि ततः निर्गतवान्।

अपरः सामान्यः याचकः स्वस्य कुटीरं गत्वा अपूपं कर्तितवान्। तस्य अन्तः तेन रत्नानि प्राप्तानि। तानि दृष्ट्वा तस्य पत्नी महता सन्तोषेण अवदत् – "एतेन अहं सुवर्णहारं कारयिष्यामि" इति। तदा सः याचकः पत्नीम् अवदत् – "पुण्यात्मा आस्थानिकः एतत् कस्मैचित् साधवे दत्तवान्। सः मह्यं दत्तवान्। एतत् मम निष्कपटतायाः परीक्षार्थम् एव मया प्राप्तम् अस्ति। यः दत्तवान् सः आस्थानिकः प्रमादवशात् एतत् न दत्तवान् खलु इति आदौ मया ज्ञातव्यम्। कदाचित् चोरः तस्य गृहात् रत्नानि चोरयित्वा अपूपे गोपितवान् स्यात् अपि। चोरः तत् स्वगृहं नेतुं प्रायः योजनां कृतवान् स्यात्, तदेव कथमपि मया प्राप्तं स्यात् अपि। अथवा आस्थानिकः जानन् एव साधवे एतत् दत्तवान् स्यात्। तदा तु एतत् तेन साधुना एव प्राप्तव्यम्। अथवा, एतत् मदीयम् एव स्यात् चेदपि एतस्य भागशः उपयोगे एव मम अधिकारः। अर्हेभ्यः प्रतिवेशिभ्यः अपि एतस्य कश्चन भागः मया दातव्यः" इति।

ततः अचिरात् एव सः सामान्यः याचकः आस्थानिकसमीपम् आगतः। राजा तं स्वसमीपम् आनाय्य – 'एतानि रत्नानि भवान् एव स्वीकरोतु' इति उक्त्वा तस्य निष्कपटता-निमित्तं पारितोषिकम् अपि दत्तवान् सः।

"यः साधुः इव व्यवहृतवान् सः दुष्टः यथायोग्यं दण्डयिष्यते मया। मया तु अद्य उत्तमः पाठः पठितः। यदि प्रथमचिन्तनमात्रे मया विश्वसितं स्यात् तर्हि मया सत्यम् अवगतं न अभविष्यत् एव" इति आस्थानिकान् उद्दिश्य अवदत् राजा।

अस्माकं राष्ट्रगीतम्

१९११ तमे वर्षे रवीन्द्रनाथटागौरवर्येण रचितं 'जन गण मन' गीतं मूलतः बेङ्गालीभाषायाः अस्ति। तच्च गीतं 'तत्त्वबोधप्रकाशिका' नामिकायाम् आर्यसमाजीयायां पत्रिकायां प्रकाशितम् आसीत् ऐदम्प्राथम्येन। कतिपयानि वर्षाणि तस्याः पत्रिकायाः सम्पादकत्वं विहितं रवीन्द्रनाथटागोरवर्येण।

१९१९ तमवर्षे कविः एषः बेसेण्ट्थियोसफिकल्महाविद्यालयस्य प्राचार्यस्य आह्वानेन आन्ध्रप्रदेशस्य चित्तूरुजनपदस्य मदनपल्लीम् आगतवान् आसीत्। सः प्राचार्यः आसीत् ऐरिश्कविः जेम्स् एच्. कासिन्सनामा।

फेब्रुवरीमासस्य प्रथमे दिनाङ्के सायं डा. कासिन्स् तस्य पत्नी मार्गरिट्, केचन छात्राः च बेङ्गालीगीतस्य गानं कर्तुं प्रार्थयन्त कविमहाशयम्। तस्य गीतस्य अन्तिमपङ्क्तिः यदा गीता तदनु एव सर्वे रोमाञ्चिताः सन्तः 'जय हे जय हे' इति ऐककण्ठ्येन अगायन्।

मदनपल्लयां येषु दिवसेषु उषितं, तेषु एव दिनेषु अस्य गीतस्य आङ्ग्लानुवादः कृतः तेन। तदनन्तरं कासिन्सः तस्य गीतस्य रागसंयोजनं कृतवान्। 'रवीन्द्रनाथटागोरमहोदयः भौगोलिकान् प्रदेशान्, पर्वतान्, नदीः च अधिकृत्य प्रथमे भागे, द्वितीये भागे व भारतीयानि मतानि अधिकृत्य च गीतवान् अस्ति इति कासिन्सः उल्लिखितवान् स्वपुस्तके।

१९४८ तमे वर्षे रक्तदुर्गे अगस्ट्मासस्य १५ दिनाङ्के प्रथमवारं जवहरलालनेहरू यदा राष्ट्र-ध्वजोड्डायनम् अकरोत् तदा सिखरेजिमेण्ट् तेनैव रागेण तत् गीतम् अगायत् यश्च रागः कासिन्सवर्येण संयोजितः आसीत्। तेनैव रागेण तत् गीतं गीयते अद्यापि।

अभिज्ञानशाकुन्तलम् (ग्रन्थपरिचयः)

व्योम शाहः

(अनुवर्तते...)

कविकुलगुरुकालिदासप्रणीते अभिज्ञानशाकुन्तलाख्ये नाटके एतावताऽस्माभिः दृष्टं यत् मृगयार्थं मृगम् अनुगतः दुष्यन्तः कण्वशिष्येण वैखानसेन बोधितः । तदनुरोधेन पुण्याश्रमं गतस्य तस्य शकुन्तलायायां स्नेहः समुत्पन्नः । इष्टिकाले आपद्भयनिवारणार्थम् ऋषिभिः आहूतः दुष्यन्तः । तत्रैव तान् रक्षन् सः स्थितः । तदा तयोः गान्धर्वविवाहः जातः । ततः दुर्वासोमुनिशापप्रसङ्गः । कण्वेन दैवाद् दुष्यन्तशकुन्तलयोः विषये ज्ञातम् अनुज्ञातं च । ततः शकुन्तलां सज्जीकृत्य राजकुलाय निर्गताः सर्वे आश्रमाद् निर्गच्छन्तः विरहदुःखम् अनुभवन्ति । क्रमेण राजभवनं प्राप्ताः । तत्र राज्ञा परिणयः निषिद्धः तां च नानुजानात् । दुःखितास्ते गताः स्वस्थानम् । इतः रक्षकाभ्यां कश्चिद् धीवरः धृतः । तस्मात् किञ्चिद् अङ्गुलीयकं प्राप्तम् । तदङ्गुलीयकं दृष्ट्वा स राजानं प्रति नीतः । राज्ञा विस्मृतं सर्वमपि इदानीं स्मृतिपथम् आगतम् । सः शकुन्तलायै विरहवेदनाम् अनुभवति । तेन स्वराज्ये मधूत्सवः निषिद्धः । ततः विदूषकेन सह लतामण्डपे यदा तस्याः चित्रं पश्यति स्म ।

चित्रे तिस्रः महिलाः आसन् । तासु कतमा शकुन्तला इति विदूषकस्य शङ्का आसीत् । विदूषकस्य अनुमानं राजा अङ्गीकरोति । यावता कालेन ते चित्रफलकं न्यभालयन् तावतैव चेटी प्रविश्य ज्ञापितवती यत् देवी वसुमती अत्र आगच्छति । राजा चित्रं विदूषकाय दत्त्वा तम् अन्यत्र प्रेषयति । प्रतिहारी प्रविश्य अमात्यस्य सन्देशं निवेदयति । देवीविषये पृष्टे सः राज्ञे निवेदितवान् यत् तस्य हस्तेषु पत्राणि दृष्ट्वा वसुमती निर्गता । पत्रे लिखितमासीत् यत् धनवृद्धिनामा कश्चिद् वणिग् नौव्यसने मृतः । सः अनपत्यः आसीत् अतः अनेककोटिसङ्ख्यं वसु राज्ञे समर्पिष्यते । अनपत्यतां दृष्ट्वा खिन्नः राजा अनुमिनोति यत् धनवत्त्वात् सः बहुपत्नीकः स्यात् । पृच्छापूर्वकं ज्ञातं यत् साकेतकपुरस्य कस्यचित् श्रेष्ठिनः निर्वृत्तपुंसवना दुहिता वर्तते । नृपेण झटिति निर्णीतं यत् एतद् धनं तस्मै समर्पणीयमिति । अमात्यः निवेदितः । ''सन्ततिविच्छेदनिरालम्बना मूलपुरुषावसाने संपदः परमुपतिष्ठन्ते'' इति चिन्तयतः नृपस्य मनसि अयमेव विचारः प्रादुरभूत् यत् कालेन पुरुवंशश्रियोऽपि विच्छेदमेव प्राप्स्यन्ति –

अस्मात् परं बत यथास्मृति संभृतानि को नः कुले निवपनानि करिष्यतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुसेकमुदकं पितरः पिबन्ति ॥६।२८॥

इतः कालनेमिपुत्राः केचिद् राक्षसाः इन्द्राय दुर्जयाः इव भान्ति । अतः तेन मातलिः प्रेषितः दुष्यन्तस्य अग्रतः। दुष्यन्तेन सद्यः एव आमन्त्रणं स्वीकृतं रथः च आरूढः। अनेन षष्ठाङ्कस्य समाप्तिः भवति।

अथ सप्तमाङ्कस्य प्रारम्भः । देवराक्षससङ्ग्रामे दुष्यन्तं जयन्तं दृष्ट्वा इन्द्रेण तस्य सत्कारः कृतः । भूलोकं पुनरागच्छतः तस्य मातलिना सह संलापः जातः । मातलिः कथयति यत् सः शतक्रतुतः नूनम् इदृशं सत्कारम् अर्हति यतः तेन युद्धे तथाविधं शौर्यप्रदर्शनमपि कृतम् । शौर्यप्रदर्शनं तु इन्द्रस्यैव महिम्ना जातम् –

सिध्यन्ति कर्मसु महत्स्वपि यन्योज्याः सम्भावनागुणमवेहि तमीश्वराणाम् ।
किं प्राभिष्यदरुणस्तमसां वधाय तं चेत् सहस्त्रकिरणो धुरि नाऽकरिष्यत् ॥७।४॥

अथ संलपन् तौ हेमकूटं नाम पर्वतं पश्यतः । तत्र तपस्विनां दर्शनाय उत्सुकौ उभौ अवतीर्णौ । तौ मरीचेः आश्रमं प्रविशतः । तपोवनस्थानं दृष्ट्वा राजा परां मुदम् आप्तवान् । राजा क्वचिद् उपविशति । मातलिः राज्ञः आगमनं सूचयितुम् ऋषेः आश्रमे भ्रमति । इतः राज्ञः नेत्रे स्फुरणं भवति । तदैव राज्ञा तापसीभ्याम् अनुरुध्यमानस्य बालस्य ध्वनिः श्रुतः । तदैव बालः प्रविश्य वदति –

यिम्भ ले सिंहशावआ यिम्भ । दन्ताइं ते गणइश्शं । (जृम्भस्व रे सिंहशावक! जृम्भस्व । दन्तांस्ते गणयिष्ये ।)

(क्रमशः...)

मासवार्त्ता:

आरब्धः "Value Education through Sanskrit" बालसंस्कृतवर्गः इति अभ्यासक्रमः ।

बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्षीकृत्य एकलव्य –संस्कृत–फाउण्डेशनसंस्थानेन "Value Education through Sanskrit" बालसंस्कृतवर्गः इति अभ्यासक्रमः सञ्चाल्यते। अभ्यासक्रमेऽस्मिन् Skg तः ९ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति । एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः तद्यथा उच्चारणशुद्धिः, स्मरणशक्तेः विकासः, व्यक्तिविकासश्च वर्धिष्यन्ते। अत्र उल्लेखनीयं यत् बालैः सह तेषां पोषकाणां कृते अपि संस्कृताध्यापनस्य व्यवस्था संस्थानेन कल्पितास्ति । एकलव्य–संस्कृत–फाउण्डेशन–संस्थानस्य अमदावादकेन्द्रे, गान्धिनगरकेन्द्रे च जुनमासस्य १४ दिनाङ्कतः बालवर्गाः संस्कृतभाषाशिक्षणवर्गाः च आरब्धाः वर्तन्ते । उभयोः केन्द्रयोः आहत्य ८५ छात्राः संस्कृताध्ययनस्य आरम्भम् अकुर्वन्। श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः, श्रीपारुलः व्यासः. श्रीरागिणी गोवाडिया, श्रीदीशा परमारः, डॉ. अमी जोशी, श्रीमती ओजसी सुखटङ्करः, श्रीचिरागः शुक्लः च छात्रान् पाठयिष्यन्ति । अभ्यासक्रमोऽयं मार्चमासपर्यन्तं प्रवर्तिष्यते।

कृपया हसन्तु

रमण: चित्रापणं प्रति गत्वा एकं चित्रं दर्शयन् अपृच्छत् - "भो: महोदय ! अस्य वानरचित्रस्य मूल्यं कियत् ? आपणिक: किमपि अनुक्त्वा तूष्णीम् एव अतिष्ठत् । रमण: पुन: पृष्टवान् - "भो: अस्य वानरस्य भावचित्रस्य मूल्यं कियत् ? आपणिकस्य तदानीम् अपि मौनम् एव आसीत् । रमण: तदा कोपेन पृष्टवान् - "भो: किं भवान् मूक: वा ? किमर्थम् उत्तरं न ददाति ।" तदा स: आपणिक: विनम्रतया उक्तवान् - "महोदय, एतत् न चित्रम्, अपि तु एष: दर्पण: वर्तते ।"

★ ★ ★ ★ ★

कश्चन बालक: संसद्भवनस्य पुरत: स्वस्य द्विचक्रिकां स्थापितवान् । तत् दृष्ट्वा आरक्षक: धावन् तत्र आगत्य मृदुस्वरेण बालम् अवदत् -

आरक्षक: - रे बालक ! एतत् याननिषेधस्थानम् । अत्र किमपि वाहनं स्थापयितुं न शक्यते ।

बालक: - किमर्थं स्थापयितुं न शक्यते ?

आरक्षक: - इत: मन्त्रिण: गमनागमनं कुर्वन्ति अत: ।

बालक: - चिन्ता मास्तु महोदय ! मया द्विचक्रिकायां सम्यक् ताल: स्थापित: अस्ति ।

★ ★ ★ ★ ★

पिता - (नमनम् उद्दिश्य) भो: नमन ! अद्यतनं प्रश्नपत्रं कथम् आसीत् ? सर्वं लिखितं खलु ?

नमन: - प्रथम: प्रश्न: त्यक्त: मया । तृतीयं प्रश्नं लेखितुं न शक्तवान् । चतुर्थ: प्रश्न: विस्मृत: मया । पञ्चम: प्रश्न: तु न दृष्ट: एव ।

पिता - अस्तु, किन्तु द्वितीय: प्रश्न: ?

नमन: - केवलं स: एव: दोषपूर्ण: अभवत् ।

सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

सर्पा: पिबन्ति पवनं न च दुर्बलास्ते शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दै: फलैर्मुनिवरा गमयन्ति कालं सन्तोष एव पुरुषस्य परं निधानम् ॥

तात्पर्यम् – सामान्यत: जना: चिन्तयन्ति यत् जगति दृश्यमानानि वस्तूनि एव लक्ष्यसिद्धौ प्रमुखं पात्रं वहन्ति इति । किन्तु तत् न सत्यम् इति एतै: उदाहरणै: ज्ञायते । सर्पा: वायो: सेवनमात्रेण जीवन्ति चेदपि ते न दुर्बला: । शुष्कानि तृणानि खादन् गज: अरण्ये अत्यन्तं बलवान् भवति । कन्दमूलानि खादन्त: एव ऋषय: सर्वेषां मार्गदर्शका: सन्त: तिष्ठन्ति । अत: सन्तोष: एव पुरुषस्य परमं धनम् अस्ति न तु अन्यद् किमपि ।

सर्वं परवशं दु:खं सर्वमात्मवशं सुखम् ।
एतद् विद्यात् समासेन लक्षणं सुखदु:खयो: ॥

तात्पर्यम् – पराधीनं समग्रमपि दु:खकारकम् । स्वाधीनं सर्वं भवति सुखकारकम् । इदमेव सुखदु:खयो: संक्षिप्तं लक्षणम् ।

सर्वदा कलहायन्ते यावद् विघटिता जना: ।
वर्धतेऽन्योन्यसौहार्दं प्रवृद्धे सङ्जीवने ॥

तात्पर्यम् – ऐक्यं यदि न स्यात् तर्हि सर्वदा कलह: भवति, साङ्घिकं जीवनं वर्धते चेत् स्नेहभाव: अपि वर्धते ।

ज्ञानसरित्

श्यामः पटेलः

मांसाहारिणः वनस्पतयः – प्रायः वनस्पतयः सूर्यप्रकाशेन मूलैः वा भूमितः स्वकीयम् आहारं प्राप्नुवन्ति । तथा केचन वन्यपशवः मांसभोजिनो भवन्ति इति वयं जानीमः । किन्तु विश्वे अपरमेकं कौतुकं वर्तते यत् वनस्पतयः अपि मांसाहारिणः भवन्ति । एते मशकादीनां जन्तूनाम् आखेटं कुर्वन्ति । एतादृशाः वनस्पतयः आखेटार्थं जन्तूनां पृष्ठे अनुधावनं कर्तुं न शक्नुवन्ति । अतः आखेटम् आक्रष्टुं विविधव्यूहान् रचयन्ति । विश्वे एतादृशाः वनस्पतयः ४०० यावन्तः सन्ति । तेषां सर्वेषाम् आखेटस्य रीतिः भिन्ना भवति । तद्यथा – 'पीचर–प्लान्ट' नामा वनस्पतिः शङ्खाकाराणि पर्णानि विदधाति । तस्य पर्णस्य विलद्वारे स्निग्धद्रवः भवति । येन डयमानाः मशकादयः तत्र निरुद्धीभवन्ति ।

'सनड्यू ए विनस फ्लाय ट्रेप' इत्याख्यस्य वनस्पतेः पर्णे यदा जन्तुः उपविशति तदैव पर्णं वीटीरूपं भूत्वा जन्तोः निग्रहं करोति । 'बटर–वर्टस' अभिधस्य वनस्पतेः पर्णानि नवनीतमिव स्निग्धानि भवन्ति । कीटाः एकवारं तत्र उपविशन्ति तदनु ततः आत्मानं मोक्तुं न शक्नुवन्ति । 'मन्की क्लावर' इत्यस्य पुष्पं कीटे उपविष्टे सहसा पिहितं भवति । तदनन्तरं एतैः वनस्पतिभिः जाले निरुद्धः जन्तुः पाचनान्ते आहाररूपेण स्वीक्रियते । केचित् वनस्पतयः तु समीपस्थं वृक्षं सस्यं वा मारयित्वा स्वकीयम् आहारम् अश्नन्ति । एतादृशाः वनस्पतयः स्वीयानि मूलानि प्रसार्य समीपस्थस्य वृक्षस्य मूले रोगान् प्रवर्तय्य तं नाशयन्ति । अयि शाकाहारि–मानवाः ! किं चिन्तयन्ति भवन्तः ?

शब्दमञ्जूषा

देवटः	कारीगर	artisan
प्रातिनिधिकः	स्थानापन्न	substitute
जवनिका	जवनी	curtain
अजिह्मः	सीधा	straight
पेशः	रूप	form
पैत्तः	पित्तीय	bilious
नैष्ठ्यम्	स्थायित्व	constancy
शुषिरः	छिद्रयुक्त	perforated
आशंसा	अभिलाषा	desire
कलः	मधुर और अस्पष्ट	sweet and indistinct
दम्भः	धोखा	deceit
प्रश्लिष्टः	मरोड़ा दिया हुआ	twisted
कुशेशयः	कुमुद	water-lily
लाषुकः	लोलुप	covetous
समुन्नः	गीला	wet

किं भवन्तः जानन्ति ?

१) गरबानृत्यशैल्यां भक्ताः मस्तकस्य उपरि किं स्थापयन्ति ?

(क) कण्डोलम् (ख) घटम् (ग) पुष्पम् (घ) कलशम्

२) एतासु उत्तर भारतस्य नृत्यशैली का अस्ति ?

(क) ओडिसी (ख) यक्षगणः (ग) भरतनाट्यम् (घ) कत्थकम्

३) 'यक्षगणः' इति नृत्यशैली केन सह सम्बद्धा वर्तते ?

(क) पञ्जाबेन (ख) कर्णाटकेन (ग) असमेन (घ) राजस्थानेन

४) 'कुचुपुडी' इति नृत्यशैली केन प्रान्तेन सह सम्बद्धा अस्ति ?

(क) गुजरातेन (ख) उत्तराञ्चलेन (ग) आन्ध्रप्रदेशेन (घ) झारखण्डेन

५) 'लावणी' इति नृत्यशैली केन प्रान्तेन सह सम्बद्धा अस्ति ?

(क) महाराष्ट्रेण (ख) छत्तीसगढेन (ग) पञ्जाबेन (घ) बिहारेण

६) भारतीयसङ्गीतस्य उत्पत्तिः कस्मात् ग्रन्थात् जातास्ति ?

(क) उपनिषदः (ख) महाभारतात् (ग) वेदात् (घ) रामायणात्

७) राजस्थाने कस्यां नृत्यशैल्यां केवलं महिलाः एव भागं वहन्ति ?

(क) बागरियाम् (ख) घूमरे (ग) पनिहार्याम् (घ) गोपिकालीलायाम्

उत्तराणि – (१) ख (२) घ (३) ख (४) ग (५) क (६) ग (७) ख

अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT FOUNDATION
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઈચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઈચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત ફાઉન્ડેશન દ્વારા આયોજિત

Diploma In Sanskrit Teaching

શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય કોર્ષમાં

ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

અભ્યાસક્રમની વિશેષતા :

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડૉ. મિહિર ઉપાધ્યાય **9824616237**

EKLAVYA SANSKRIT FOUNDATION
॥ जयतु संस्कृतं जयतु भारतम् ॥

(Online)

Value Education Through Sanskrit

बालसंस्कृतवर्गः

(Class 3 to 8)

Date : 11/7/26 to 11/4/27
Day : Saturday
Time : 6.00pm to 7.30pm
Fees : ₹ 8500/-

Why learn Sanskrit?
Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

Online/ Offline

Admission Open

संस्कृतभाषाशिक्षणम्

Third Level

Date : 3/8/26 to 23/10/26
Day : Mon-Wed-Fri
Time : 6:30pm to 8:00pm
Fees : 7000/-

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

Venue:
Core House,
Off CG Road, Ah'bad

संस्कृत-
साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

ग्राहक शुल्कम्

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

प्रियवाचकाः

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

Published, Printed and Edited by Dr. Mihir Upadhyay
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
Fax: (91) 79 26563681
Mobile: (91) 98246 16237
e-mail: mihiresa@gmail.com
web: www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006